# Manah Prarthana Ashtakam

# મનઃપ્રાર્થનાષ્ટકમ્

## Document Information

Text title : Manah Prarthana Ashtakam

File name : manaHprArthanAShTakam.itx

Category : misc, moropanta, aShTaka

Location : doc_z_misc_general

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# મનઃપ્રાર્થનાષ્ટકમ્

(સારઙ્ગવૃત્તં)
કામેન મૂઢઃ સ્વકામેક્ષણોત્કોઽત્ર કામેતિનાતિ ન ધામેહ મોદાય ।
મા મે મનો! વાચમામેતિ મન્યસ્વ રામે ત્રિલોકીલલામે રમસ્વાશુ ॥ ૧॥

(૧)સવ્યં કરં યસ્ય ભવ્યં શ્રિતં ધન્વદક્ષે દ્વિષન્નાશદક્ષેષુયુગ્મં ચ ।
ક્ષત્રેશ્વરં પદ્મપત્રેક્ષણં રામમેકં ભજ સ્વાન્ત ! કે કં પરાર્થાય ॥ ૨॥

ધામારમજદ્રવ્યરામાદિકં ચિત્ત ! । કામામયાયૈવ મા મા શ્વસિહ્યત્ર ।
ક્ષ્મામાવરાત્ત્વં(૨) સતામાશ્રયાદ્ધન્ત રામાદૃતે યાસિ કામાસ્મસિદ્ધિં નુ ॥ ૩॥

લઙ્કાવરારિ કલઙ્કાપહં ભૂમ્યલઙ્કારમિચ્છાબલં કામદં ચિત્ત ! ।
સાકેતપં હેતુના કેન નો યાસિ નાકેઽપિ નમ્રા મુદા કેન તં હન્ત ॥ ૪॥

યે વાસવેશાદિદેવા ભજન્ત્યેનમેવાધિપં પાદસેવારતાઃ સાધુ ।
સીતાધવં દત્તભીતાભયં ચિત્તવીતાઽગુણં મેદિનીતારકં પ્રૈહિ ॥ ૫॥

પાપક્ષયેઽહં સ્વતાપનમીશાનમાપદ્મજાધારમાપદ્ધરં મઙ્ક્ષુ ।
શોકાપહં સર્વલોકાધિપં યાહિ ભો કા વદામ્બા ન તો કાસુખં(૩) હન્તિ ॥ ૬॥

કર્તાસ્ય વિશ્વસ્ય ભર્તાપિ ચાન્તે સ હર્તા શ્રિયઃ પ્રાણભર્તા શૃણુ સ્વાન્ત! ।
માતા પિતા સૈવ દાતાવિતા કો નુ ધાતા પરોઽસ્માદ્વિધાતાયમે વાઙ્ગ! ॥ ૭॥

શ્રુત્યા પદં યસ્ય નુત્યા વૃતં યઃ પ્રકૃત્યા મૃદુઃ સાધુકૃત્યાશ્રયશ્ચિત્ત! ।
વ્યાસાદિભિઃ સદ્ભિરાસાદિતં સર્વદાસાપ્ત ! મે હ્યપ્રયાસાય મોદાય ॥ ૮॥

(૨)ઇતિ મયૂરકૃતં મનઃપ્રાર્થનાષ્ટકં સમ્પૂર્ણમ્ ।

ટિપ્પણિ
* સારઙ્ગવૃત્તઘટિતમિદં મનઃપ્રાર્થનાષ્ટકમતીવ દુર્બોધમ્ । અત્ર કવિઃ સ્વાન્તં રામચિન્તનાય પ્રયોજયિતુમુદ્યતસ્તત પ્રાર્થયતે । પ્રથમપદ્યસ્ય પ્રથમાર્ધસ્યાર્થસ્તુ સૌકર્યેણ નાવબુધ્યત એવ ।
૧। યસ્ય સવ્યં કરં ભવ્યં શ્રિતમિત્યન્વયઃ ।

૨। ક્ષ્મા ચ માં ચ તયોર્વરાત્ ।

૩। તોકસ્ય બાલકસ્યાસુખમ્ ।

૪। ઇદમષ્ટકમસ્માભિઃ કવિલિખિતમનુસૃત્ય મુદ્રિતમ્ । પ્રયતિતં ચ યાવચ્છક્યમર્થાવગમાય । તથાપિ પ્રથમે। પ્રથમપાદત્રયસ્ય દ્વિતીયે તુરીયસ્ય પઞ્ચમે ચોત્તરાર્ધસ્યાર્થો ન યથાવદવગમ્યતે ઇતિ નિવેદયામહે । * અત્ર શ્રીમદ્ભાગવતસ્ય દશમસ્કધસ્થં કથાવિભાગં કવિઃ ક્રમેણ પજ્ઝટિકાચ્છન્દસોપવર્ણયતિ । કથારસજ્ઞાનાં ચ નૈતત્પ્રકરણં દુરૂહં ભવેદિતિ કાનિચિદેવ પદાનિ વ્યાખ્યાયન્તે ।

Proofread by Rajesh Thyagarajan

---

*Manah Prarthana Ashtakam*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*